Roll No Code No: 9185106

# Directorate of Distance Education

## Acharya First Year Annual Examination May/June, 2018

## Paper - 1, Vyakarana

(लघुशब्देन्दुशेखरः-पञ्चसन्ध्यन्तो भागः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** केचित् पञ्च प्रश्नाः समाधेयाः। **5x20=100**

(१) दीक्षितमते रप्रत्याहारं संसाध्य नागेशरीत्या तत्प्रत्याख्यानं कुरुत।

(२) लघुशब्देन्दुशेखरस्य मङ्गलाचरणं विस्तरेण व्याख्यात।

(३) अनुबन्धानाम् अनेकान्तत्वम् उत एकान्तत्वं वेति नागेशदिशा साधयत।

(४) 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रं शेखरदिशा व्याख्यात।

(५) स्थानेऽन्तरतमः इति सूत्रे स्थानपदार्थं निरूप्य तमब्ग्रहणस्य प्रयोजनञ्च प्रतिपाद्य परिभाषां व्याख्यात।

(६) 'न पदान्त' इत्यादिसूत्रं शेखरदिशा व्याख्याय सूत्रस्थस्य विधिशब्दस्य भावसाधनत्वं निरूपयत।

(७) 'ङमो ह्रस्वादचि ङमुण्णित्यम्' इति सूत्रार्थं विलिख्य परमदण्डिनौ इत्यत्र ङमुडभावं साधयत।

(८) 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रार्थं व्यवस्थितविभाषात्वञ्च शेखरदिशा लिखत।

(९) 'निपात एकाजनाङ्' इति सूत्रं शेखरदिशा व्याख्यात।

(१०) 'अन्तादिवच्च' इति सूत्रं स्थानिवत्सूत्रेण गतार्थं न वेति यथाशेखरं विवेचयत।

**000**

Roll No Code No: 9185107

# Directorate of Distance Education

## Acharya First Year Annual Examination May/June, 2018

## Paper - 2, Vyakarana

(महाभाष्यम्- १-६ आह्निकानि)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** **केचित् पञ्च प्रश्नाः समाधेयाः ।** **5x20=100**

(१) शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे ।

(२) व्याकरणाध्ययनस्य मुख्यप्रयोजनानि यथाभाष्यं लिखत ।

(३) महाभाष्यदिशा ऋलुक्सूत्रे लृकारोपदेशस्य प्रयोजनम् अस्ति न वा इति विचारयत ।

(४) 'इको गुणवृद्धी' इति सूत्रे 'इक्' ग्रहणस्यावश्यकतां यथाभाष्यं प्रतिपादयत ।

(५) संयोगसंज्ञायां सहग्रहणं कर्तव्यं न वा इति यथाभाष्यं विमृशत ।

(६) 'ईदूदेद्विवचनं प्रगृह्यम्' इति सूत्रं यथाभाष्यं व्याख्यात ।

(७) 'सर्वादीनि सर्वनामानि' इति सूत्रे 'संज्ञोपसर्जनप्रतिषेधः' कर्तव्यो न वेति विचारयत ।

(८) 'न बहुव्रीहौ' इति सूत्रस्य प्रयोजनं तत्प्रत्याख्यानप्रकारश्च वर्णयत ।

(९) 'मुखनासिकावचनोऽनुनासिकः' इति सूत्रं भाष्यदिशा व्याख्यात ।

(१०) वर्णानामुपदेशस्य फलं विमृशत ।

**000**

Roll No Code No: 9185108

# Directorate of Distance Education

## Acharya First Year Annual Examination May/June, 2018

## Paper - 3, Vyakarana

(भूषणसारे धात्वर्थविचारः, वैयाकरणसिद्धान्तकौमुद्यां, णिच्, सन्प्रकरणे, ज्ञापकसङ्ग्रहः परिशिष्टवर्जितः)

**Time : 3 hrs. Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I. पञ्च प्रश्नाः समाधेयाः । 5x10=50**

(१) 'फलव्यापारयोर्धातुः' इत्यादिकारिकां सुष्ठु व्याख्यात ।

(२) कर्तृकर्मणोराख्यातार्थत्वे मानं प्रदर्शयत ।

(३) 'भूवादयो धातवः' इति सूत्रं व्याख्याय धातुलक्षणं यथाभाष्यं निरूपयत ।

(४) 'पश्य मृगो धावति' इत्यत्र वैयाकरणरीत्या निर्दुष्टः शाब्दबोधः कथं फलतीति निरूपयत ।

(५) 'फलमात्रं धात्वर्थः' इति मीमांसकमतं खण्डयत ।

(६) सिद्ध-साध्यक्रिययोः सलक्षणं भेदं दर्शयत ।

(७) आख्यातस्य कर्तृकर्मशक्तत्वे उभयबोधापत्तिं वारयत ।

(८) 'साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्' इति पङ्क्तेराशयं स्पष्टयत ।

**II. पञ्च सूत्राणि व्याख्यात । 5x5=25**

(१) तत्प्रयोजको हेतुश्च ।

(२) भियो हेतुभये षुक् ।

(३) णौ च संश्चङोः ।

(४) णौ गमिरबोधने ।

(५) धातोः कर्मणः समानकर्तृकादिच्छायां वा ।

(६) अज्झनगमां सनि ।

(७) रलो व्युपधाद्धलादेः संश्च ।

(८) सनि मीमाघुरभलभशकपतपदामच इस् ।

**III. पञ्च प्रश्नाः समाधेयाः । 5x5=25**

(१) 'ददाति दधात्योर्विभाषा' इत्यनेन किं ज्ञाप्यते ।

(२) 'भूवादयो धातवः' इत्यत्र आदिग्रहणं किं ज्ञापयति ।

(३) अपृक्तसंज्ञाविधायके सूत्रे एकग्रहणस्य फलं लिखत ।

(४) 'एकः पूर्वपरयोः' इति सूत्रं किं ज्ञापयति ।

(५) स्त्रीप्रत्ययेषु तदन्तविधेः फलं लिखत ।

(६) 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रे ङिद्ग्रहणं किं ज्ञापयति ।

(७) वर्णग्रहणे जातिग्रहणम् इत्यस्य ज्ञापकं लिखत ।

(८) इण्प्रत्याहारः परेणैव णकारेण इत्यस्य प्रमाणं लिखत ।

**000**

Roll No Code No: 9185109

# Directorate of Distance Education
## Acharya First Year Annual Examination May/June, 2018
## Paper - 4, Vyakarana

(परिभाषेन्दुशेखरः-सम्पूर्णः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** केचित् पञ्च प्रश्नाः समाधेयाः । **5x20=100**

(१) यदागमपरिभाषायाः सिद्धिप्रकारमुपवर्ण्य अनित्यत्वे मानञ्च प्रदर्श्य तस्याः स्थानिवत्सूत्रेण गतार्थता अस्ति न वेति विचारयत ।

(२) 'यत्रानेकविधामान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषायाः सिद्धिप्रकारमुपवर्ण्य चतुर्विधमान्तर्यं सोदाहरणं निरूपयत ।

(३) गौणमुख्यपरिभाषा कुत्र प्रवर्तते ? गौणत्वं मुख्यत्वं च कीदृशमिति शेखरदिशा व्याख्यात ।

(४) 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति परिभाषां व्याख्याय भाष्यवार्तिककारयोः मतभेदम् उपस्थापयत।

(५) 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधते' इति परिभाषायाः ज्ञापकमुपपाद्य अत्र दीक्षितनागेशयोः मतभेदं प्रदर्शयत ।

(६) 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायाः ज्ञापकं विलिख्य एषा त्रिपाद्यां प्रवर्तते न वेति स्पष्टयत ।

(७) गतिकारकोपपदानामिति परिभाषायां ज्ञापकमुपपाद्य अस्याः अनित्यत्वे बीजं फलं च प्रदर्शयत ।

(८) 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति परिभाषां यथाशेखरं व्याख्यात ।

(९) 'एकदेशविकृतमनन्यवत्' इति परिभाषां यथाग्रन्थं विशदयत ।

(१०) 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इत्यस्याः बीजमुपवर्ण्य न्यायसिद्धत्वञ्च निराकृत्य कारकविभक्तित्वं किमिति निरूपयत ।

**000**

Roll No Code No: 9185110

# Directorate of Distance Education

## Acharya First Year Annual Examination May/June, 2018

## Paper - 5, Vyakarana

(वाक्यपदीयम्-ब्राह्मकाण्डम्, परमलघुमञ्जूषा-आदितः तात्पर्यान्ता, वैयाकरणसिद्धान्तकौमुदी-नामधातु-आत्मनेपद-परस्मैपदप्रकरणानि, भाषाशास्त्रञ्च)

**Time : 3 hrs.** **Max. Mark: 100**

---

**(Write answers in Answer booklet only)**

**I.** **त्रयः प्रश्नाः समाधेयाः ।** **3x10=30**

(१) ध्वनेः स्वरूपं प्रदर्श्य ध्वनिस्फोटयोः भेदं सम्बन्धञ्च विमृशत ।

(२) शब्दब्रह्मणः स्वरूपं प्रतिपाद्य ब्रह्मप्राप्त्युपायं विवृणुत ।

(३) वाक्यपदीयदिशा अपभ्रंशभाषाणाम् उत्पत्तिहेतुं तेषाम् अर्थबोधकत्वञ्च निरूपयत ।

(४) भर्तृहरिसम्मतानि प्रमाणानि निरूपयत ।

(५) अनुमानस्य तर्कस्य वा अकिञ्चित्करत्वं वाक्यपदीयदिशा प्रतिपादयत ।

**II.** **चत्वारः प्रश्नाः समाधेयाः ।** **4x5=20**

(१) अष्टौ स्फोटाः के ?

(२) 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः'-व्याख्यात ।

(३) वैयाकरणमते का नाम शक्तिः ।

(४) शक्तेस्त्रैविध्यं सोदाहरणं निरूपयत ।

(५) लक्षणाभेदान् मञ्जूषादिशा निरूपयत ।

(६) आकाङ्क्षायाः स्वरूपं प्रतिपादयत ।

(७) का नाम योग्यता ?

(८) परादीनां वाचां प्रदेशाः के ?

**III.** **चत्वारि सूत्राणि व्याख्यात ।** **4x5=20**

(१) सुप आत्मनः क्यच् ।

(२) उपमानादाचारे ।

(३) भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ।

(४) कष्टाय क्रमणे ।

(५) कर्तरि कर्मव्यतिहारे ।

(६) वृत्तिसर्गतायनेषु क्रमः ।

(७) अनुपराभ्यां कृञः ।

(८) व्याङ्परिभ्यो रमः ।

**IV.** **पञ्च प्रश्नाः समाधेयाः ।** **5x6=30**

(१) भाषायाः स्वरूपं विविच्य तस्याः भेदान् निरूपयत ।

(२) स्वरलोपं विचारयत ।

(३) ध्वनिपरिणामकारणानि विशदयत ।

(४) अर्थविस्तार-सङ्कोच-विनिमयान् विवृणुत ।

(५) वाक्यस्य स्वरूपं विमृशत ।

(६) अर्थपरिवर्तनकारणानि प्रतिपादयत ।

(७) मूर्धन्यनियमं विचारयत ।

(८) लोपागमादीन् सोदाहरणं निरूपयत ।

**000**